# ॥ वैद्यनाथाष्टकम् ॥

श्रीराम-सौमित्रि-जटायु-वेद-षडाननादित्य-कुजार्चिताय।
श्रीनीलकण्ठाय दयामयाय श्रीवैद्यनाथाय नमः शिवाय॥ १ ॥

गङ्गाप्रवाहेन्दुजटाधराय त्रिलोचनाय स्मरकालहन्त्रे।
समस्तदेवैरभिपूजिताय श्रीवैद्यनाथाय नमः शिवाय॥ २ ॥

भक्तःप्रियाय त्रिपुरान्तकाय पिनाकिने दुष्टहराय नित्यम्।
प्रत्यक्षलीलाय मनुष्यलोके श्रीवैद्यनाथाय नमः शिवाय॥ ३ ॥

प्रभूतवातादि-समस्तरोगप्रनाशकर्त्रे मुनिवन्दिताय।
प्रभाकरेन्द्वग्निविलोचनाय श्रीवैद्यनाथाय नमः शिवाय॥ ४ ॥

वाक्श्रोत्रनेत्राङ्घ्रि-विहीनजन्तोर्वाक्श्रोत्रनेत्राङ्घ्रि-सुखप्रदाय।
कुष्ठादिसर्वोन्नतरोगहन्त्रे श्रीवैद्यनाथाय नमः शिवाय॥ ५ ॥

वेदान्तवेद्याय जगन्मयाय योगीश्वरध्येयपदाम्बुजाय।
त्रिमूर्तिरूपाय सहस्त्रनाम्ने श्रीवैद्यनाथाय नमः शिवाय॥ ६ ॥

स्वतीर्थमृद्भस्मभृताङ्गभाजां पिशाचदुःखार्तिभयापहाय।
आत्मस्वरूपाय शरीरभाजां श्रीवैद्यनाथाय नमः शिवाय॥ ७ ॥

श्रीनीलकण्ठाय वृषध्वजाय स्त्रग्गन्धभस्माद्यभिशोभिताय।
सुपुत्रदारादिसुभाग्यदाय श्रीवैद्यनाथाय नमः शिवाय॥ ८ ॥

बालाम्बिकेश वैद्येश भवरोगहरेति च।
जपेन्नामत्रयं नित्यं महारोगनिवारणम्॥

महादेव महादेव महादेव महादेव महादेव महादेव महादेव महादेव।
महादेव महादेव महादेव महादेव महादेव महादेव महादेव महादेव॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Vaidyanathashtakam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits